नं० ५१३१

नाम - बौधायन श्रौत सूत्राणि

कर्ता - बौधायनः

पत्र संख्या - २३ पत्राणि सं० —— ×

विषयः - सूत्र पद्धतिः

बौद्धायनसूत्रप्रथमाध्यायः

५१३१

बौधायनकल्पे
प्रथमाध्याये

सूत्र ॥१॥

॥श्रीगणेशायनमः॥ आमावास्येनवापौर्णमासेनवाहविषायक्ष्यमाणोभवतिसपुरस्तादेव
हविरातंचनमुपकल्पयतएकाहेनवाद्व्यहेनवायथर्तुथवैब्राह्मणंभवतिदध्नातनक्तिसंदत्ता
याग्निहोत्रोच्छेषणमभ्यातनक्तियज्ञस्यसंतत्याइतिचंद्रमसंवानिर्ज्ञायसंपूर्णंवाविज्ञायाग्नी
नन्वादधातित्रीणिकाष्ठानिगार्हपत्येभ्यादधातित्रीण्यन्वाहार्यपचनेत्रीण्याहवनीयेपरिस
मूहंत्युपवसथस्यरूपंकुर्वंत्यथास्यव्रतोपेतस्यपर्णशाखामाच्छेतिप्राग्वोदग्वावाचंयमो
यत्रवावेत्त्यसन्मन्यतेसायाप्राचीवोदीचीवाबहुपर्णाबहुशाखाप्रतिशुष्काग्राभवतितामा
छिनत्तीषेत्वोर्जेत्वेतितयावत्सानपाकरोतिवायवस्थोपायवस्थेःत्यथैषांमातॄःप्रेरय
तिदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्वमघ्नियादेवभागमूर्जस्वतीःपय
स्वतीःप्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघशंसोरुद्रस्यहेतिःपरिवोवृण
क्तितिध्रुवाअस्मिन्गोपतौस्यातबह्वीरितियजमानमीक्षतेथैतांशाखा—ग्रेणाहव राम ॥१॥

नीयं पर्याहृत्य पूर्वया द्वारा प्रपाद्य जघनेन गार्हपत्यमग्निष्ठेनस्योत्तरार्द्धे वाग्न्यागारस्योद्गृह
ति यजमानस्य पशून्पाही तिनु यद्द्विसंनयति यद्ध्रुवेन संनयाति बर्हिः प्रतिपदेव भवि ति ॥१॥
अथ जघनेन गार्हपत्यं तिष्ठन्नसिदं वाऽश्वपरशुं वा दत्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहु
भ्यां पूष्णो हस्ताभ्यामाददऽइत्यादत्याभिमंत्रयते यज्ञस्य घोषदसीति गार्हपत्ये प्रतितपति प्र
त्युष्टं रक्षः प्रत्युष्टा अरातयऽइत्यत्रिरथाहवनीयमभिप्रैति प्रयमगाद्धिषणा बर्हिरच्छम
नुना कृता स्वधया वितष्टा त आवहंति कवयः पुरस्ता द्देवेभ्यो जुष्टमितीह बर्हिरासदऽइति वेदिं
प्रत्यवेक्षते यथा तां दिशमेति यत्र बर्हिर्वेत्स्यन्नूमन्यते दर्भस्तंबं परिस्तृणाति यावंतमलं प्रस्त
रायमन्यते देवानां परिषूतमसीत्यथैनमूर्द्ध्वमुन्मार्ष्टि वर्षवृद्धमसीत्यसिदं नोपयच्छति दे
व बर्हिर्मा त्वान्वग्मा तिर्यक्‌ पर्व ते राध्यासमित्याच्छिनत्त्याच्छेत्ता ते मा रिषमित्याच्छेदनान्यभिमृ

सूत्र
॥२॥

2

शान्तिदेवबर्हिः शतवल्शंविरोहेतिसहस्रवल्शाविवयंरुहेमेत्यात्मानंप्रत्यभिमृशतेसर्वे
शएवैनंस्तंबंलुनोतिकृत्वाप्रस्तरंनिदधातिपृथिव्याःसंपृचःपाहीतितूष्णीमतऊर्ध्वमयु
जोमुष्टीलुनोतित्रीन्वापंचवासप्तवानववैकादशवायावतोवालंमन्यतेऽथत्रिरन्वाहितं
शुल्बंकृत्वापसलैरविपृथ्यअदित्यैरास्नासीतितमुदीचीनाग्रंनिधायतस्मिन्प्रस्तरंसमभिसं
भरतिसुसंभृतात्वासंभरामीतिसन्नह्यतीशात्वेसंनहनमितिग्रंथिंकरोतिपूषातेग्रंथिंग्र
थ्नात्वितिसतेमास्थादितिपश्चात्प्रांचमुपगूहत्यथैनमुद्यच्छतइंद्रस्यत्वाबाहुभ्यामुद्यच्छइ
तिशीर्षन्नधिनिधत्तेबृहस्पतेर्मूर्ध्नाहरामीत्युर्वन्तरिक्षमन्विहीत्यसोऽन्तरेणगार्हपत्य
मनधस्सादयतिदेवंगममसीतितमुपरिवनिदधातियत्रानुस्नंमन्यतेतूष्णींपरिभोजनीया
निलुनातिसकृदाछिन्नंपितृभ्यआछिनत्त्यथतथैवत्रिरन्वाहितंशुल्बंकृत्वैकविंशति

राम
॥२॥

हारुमिथमृं संनह्यति यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीनु । ततस्त्वामेकविंशतिधासं
भरामि सुसंभृतेति वेदं करोति वत्सज्ञुं पशुकामस्य मूलकार्यमन्नाद्यकामस्य त्रिवृतं तेजस्का
मस्योर्ध्वाग्रं स्वर्गकामस्य वेदिं करोति प्रागुत्तरात्परिग्राहाद्यथापराह्णे पिंडपितृयज्ञेन चरंति ॥
॥ २ ॥ अथैतस्यै शाखायै पर्णानि प्रछिद्याग्रेण गार्हपत्यं निवपत्यथैनामधस्तात्परिवास्य जघने
न गार्हपत्यं स्तंछ विमदुपवेषाय निदधात्यथास्यां प्रादेशमात्रं प्रमापय दर्भनाडीः प्रवेष्टत त्रि
वृछास्वा पवित्रं करोति त्रिवृत्सत्ला शोदर्भ इत्यान्प्रादेशसंमितः । यज्ञेपवित्रं पोतृतमं पयो हव्यं
करोतु मह्यस्यथसार्यं हृतेग्निहोत्रउत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु चतुष्टयं संसा
दयति दोहनं पवित्रं सान्नाय्यतपन्योस्थाल्या विलयथैनान्यद्भिः प्रोक्षति शुंधध्वं दैव्याय कर्म
णे देवयज्यायाइति त्रिरथ जघनेन गार्हपत्यमुपविश्योपवेषेणोदीचोंगारान्निरूहति मातरिश्व

सूत्र· ॥३॥ 3

नो घर्मोसीति तेषु सान्नाय्यतपनीमधिश्रयति द्यौरसि पृथिव्यसि विश्वधाया असि परमेण
धाम्ना दृꣳहस्व मा ह्वारिति तस्यां प्राचीनाग्रꣳ शाखापवित्रं निदधाति वसूनां पवित्रमसि शत
धारं वसूनां पवित्रमसि सहस्रधारमिति तदन्वारभ्य वाचं यम आस्ते अथ गा आयतीः प्रती
क्षत एता आचरंति मधुमद्दुहानाः प्रजावतीर्यशसो विश्वरूपाः। बह्वीर्भवंतीरुपजायमा
ना इह व इंद्रो रमयतु गाव इति महेंद्र इति वा यदि महेंद्रयाजी भवत्यथाहोपसृष्टां मे प्रब्रूता
दित्युपसृष्टां प्राह दुह्यमानामनुमंत्रयते हुतस्तोको हुतो द्रप्सोग्नये बृहते नाकाय स्वाहा द्या
वापृथिवीभ्यामित्यथ पुरस्तात्प्रसृतगामानयंतं पृच्छति कामधुक्ष इत्यमुमितीतरः प्रत्याह ताम
नुमंत्रयते सा विश्वायुरिति द्वितीयमानयंतं पृच्छति कामधुक्ष इत्यमुमेवेतरः प्रत्याह तामनुमे
मंत्रयते सा विश्वव्यचा इति तृतीयमानयंतं पृच्छति कामधुक्ष इत्यमुमित्येवेतरः प्रत्याहता

राम ॥३॥

मनुमंत्रयते सा विश्वकर्मेति तिसृषु दुग्धासु वाचं विसृजेत बृहद्गवींद्राय देवेभ्यो हव्यमाप्या
यतां पुनः॥ वत्सेभ्यो मनुष्येभ्यः पुनर्दोहाय कल्पतामिति महेंद्रायेति वा यदि महेंद्रयाजी भ
वति विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयित्वा दोहने पश्यानीय संक्षालनमानयति संपृ
च्यध्व मृतावरीरूर्मिणीर्मधुमत्तमा मंद्रा धनस्य सातय इत्यथैनत्स्वादग्नु द्वास्यनूर्गीति कृत्वा
तिरःपवित्रं दध्यातनक्ति सोमेन त्वातनच्मीन्द्राय दधीति महेंद्रायेति वा यदि महेंद्रयाजी भवति
यावतामूर्ध्वंयियिषन्मन्यते तवदानयत्यग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संततिरसि यज्ञ
स्य त्वा संततिमनु संतनोमीत्यथैनद्दृढन्वता — सेन वा चमसेन वापिदधात्यदस्तमसि विष्ण
वे त्वा यज्ञायापिदधाम्यहं॥ अद्भिररिक्तेन पात्रेण याः पूताः परिशेरते इति तदुपरि वा निदधा
ति यत्र गुप्तं मन्यते विष्णो हव्यं रक्षस्वेत्येतस्मिन्काले दर्भैः प्रातर्दोहाय वत्सानपाकरोति तूष्णीमू

सूत्र ॥४॥ ५

॥३॥ अथ प्रातर्हुतेऽग्निहोत्रे हस्तौ संमृशते कर्मण्यां देवेभ्यः शकेयमिति तिस्रः परिस्तीर्णा एवैते
ऽग्नयो भवंतीत्ययुवा अपरिस्तीर्णा भवंत्याहवनीयमेवाग्रे पुरस्तात्परिस्तृणात्यथ दक्षिणतोऽथ
पश्चादथोत्तरत एवमेवान्वाहार्यपचनं परिस्तृणात्येवं गार्हपत्यमथाग्रेण गार्हपत्यं तृणानि संस्
तीर्य तिसृषु द्वंद्वं न्यंचि यज्ञायुधानि संसादयति स्फ्यं च कपालानि चाग्निहोत्रहवणीं च शूर्पं च
कृष्णाजिनं च शम्यां चोलूखलं च मुसलं च दृषदं चोपलां च जुहूं चोपभृतं च स्रुवं च ध्रुवां च
प्राशित्रहरणे चेडापात्रं चैवमेक्षणं च पिष्टोद्वपनीं च प्रणीताप्रणयनं चाज्यस्थालीं च वेदं च
दारुपात्रीं च योक्त्रं च वेदपरिवासनं च धृष्टिं च धर्मप्रवृश्चनं चान्वाहार्यस्थालीं च मदंतीं च
यानि चान्यानि पात्राणि तान्येवमेव द्वंद्वं संसाद्य ब्रह्माणं दक्षिणत उपवेश्य पृष्ट्वापः स्तृ राम ॥४॥
णाति संततां गार्हपत्यादाहवनीयाद्यज्ञस्य संततिरसि यज्ञस्य त्वा संततये स्तृणामि संततये त्वा य

त्रस्यस्तृणामीति बर्हिषः पवित्रे कुरुते प्रादेशमात्रे समे अप्रच्छिन्नाग्रे अनखच्छिन्ने इमौ प्राणा
पानौ यजमानस्याङ्गानि सर्वशः ॥ आप्याययन्तौ संचरतां पवित्रे हव्यशोधने इत्यथैने अद्भिरनुमार्ष्टि
पवित्रे स्थो वैष्णवी स्थो यज्ञिये स्थो वायुपूते स्थो विष्णोर्मनसा पूते स्थो यज्ञस्य पवने स्थ इत्यथो
त्तरेण गार्हपत्यमुपविश्य कण्ठं संवाचमसंवा प्रणीताप्रणयनं याचति तस्मिंस्तिरः पवित्रमप
आनयं त्राह ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेति प्रसूतः समं प्राणोद्धरयमाणोऽविषिंच
न्नुद्धृत्योत्तरेणाहवनीयं दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य पवित्रमादाय प्रदक्षिणमावृत्य प्रत्य
उङ्ङाकृत्या दत्ते दक्षिणेनाग्निहोत्रहवणीं सव्येन शूर्पं विधायेति गार्हपत्ये प्रतितपति प्रत्युष्टं
रक्षः प्रत्युष्टा अरातय इत्यथ जघनेन गार्हपत्यमग्निष्ठमनो भवति तस्य स्योत्तरां धुरमभिमृश
ति धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वाम इत्यनोभिमंत्रयते त्वं देवाना

सूत्र ॥५॥ 5

मसि सस्नितमं पप्रितमं जुष्टतमं वन्हितमं देवहूतमम ह्रुतमसि हविर्द्धानं दृंहस्व मा ह्वारि
ति ॥४॥ अथ विष्णोः क्रमोसीति दक्षिणमक्षपालिं क्रमित्वाभ्यारुह्य प्रउगे शूर्पं निदधाति शू
र्पे स्रुचं स्रुचि पवित्रे अथ पुरोडाशीयानक्षतो मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मो
त्वा हिंसिषमित्युरु वातायेति तृणं वा किंचिच्छकटान्निरस्य पत्यथा पउपस्पृश्य दश होतारं व्या
ख्याय हविर्निर्वप्स्यामीति यजमानमामंत्र्य पवित्रवत्याग्निहोत्रहवण्या निर्वपति यद्युवे नानो
भवति उपघनेन गार्हपत्यं स्फ्यं निदधाति स्फ्योपरि पात्रीं पात्र्यां पुरोडाशीयानावपत्यथ स्रुवा
दूर्ध्वं पात्र्यामभिमृशति धूरसि धूर्व धूर्वन्तं धूर्व तं योस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवा
नामसि सस्नितमं पप्रितमं जुष्टतमं वन्हितमं देवहूतमम ह्रुतमसि हविर्द्धानं दृंहस्व मा राम
ह्वारित्यथ पुरोडाशीयानक्षतो मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिंसिषमित्यु ॥५॥

रूवातायेतितत्एंवाक्किंॆशारूवानिरस्यत्संधापउपस्पृश्य दशहोतारं व्याख्याय हविर्निर्वप्स्या
मीति यजमानमामंत्र्य पवित्रवत्याग्निहोत्रहवण्या निर्वप्स्यां अग्नां निर्वपेति यजमानोनुज्ञातास्त्य
थ निर्वपति देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति त्रिर
तेन यजुषा सकृत्तूष्णीमेतामेव प्रतिपदं कृत्वाग्नीषोमाभ्यामिति पौर्णमास्यामिंद्राय वैमृधाये
ति चेंद्राग्निभ्यामित्यमावास्यायामसन्नयत इंद्रायेति संनयतो महेंद्रायेति वा यदि महेंद्रयाजी
भवत्यथ निरुप्तानभिमृशतीदं देवानामितीदमु नः सहेत्यथ ये तिशिष्टा भवंति तानावपति स्फ्या
यै त्वा नारात्या इत्यथाहवनीयमीक्षतेऽस्तुवरमभिविख्येषं वैश्वानरं ज्योतिरित्यथ गृहानन्वीक्षते दृं
हंतां दुर्या द्यावापृथिव्योरित्यथैनानानयत्यो लिष्ठु लुर्वंतरिक्षमन्विहीत्यपश्चात्तरेण गार्हपत्य
मुपसादयत्यदित्यास्त्वोपस्थे सादयामीति गार्हपत्यमभिमंत्रयतेऽग्ने हव्यं रक्षस्वेति ॥५॥ अ

स्त्र
॥६॥
6

थैतस्यामेव स्रुचि तिरः पवित्रमप आनीयोदीचीनाग्राभ्यां पवित्राभ्यां त्रिरुत्पुनाति देवो वः स
वितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति पश्चाद्येनाउ महत्यनुपात्तिष्ठ स्यापो
देवीरग्रेपुवो अग्रेगुवोग्र इमं यज्ञं नयताग्रे यज्ञपतिं धत्त युष्मानिन्द्रोवृणीत वृत्रतूर्ये यूयमिन्द्र
मवृणीध्वं वृत्रतूर्ये इत्यद्भिरेवापः प्रोक्षति प्रोक्षितास्थ प्रोक्षितास्थेति त्रिरथ पुरोडाशीयान्प्रो
क्षति देवस्य त्वा सवितुः प्रसवे श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्या
ममुष्मा अमुष्मा इति यथादेवतं त्रिरुत्तानानि पात्राणि कृत्वा प्रोक्षति शुंधध्वं दैव्याय कर्मणे दे
वयज्याया इति त्रिरति शिष्टाः प्रोक्षणीर्निधाय कृष्णाजिनमवधुनोत्यूर्ध्वग्रीवमुदङ्नावत्सावधू
तं रक्षोवधूता अरातय इति त्रिरथैनत्पुरस्तात्प्रतीचीनग्रीवमुत्तरेलोमोपस्तृणात्यदित्या
स्त्वगसि प्रति त्वा पृथिवी वेत्विति तस्मिन्नुलूखलमध्यूहत्यधिषवणमसि वानस्पत्यं प्रति त्वा

यम
॥६॥

दित्यास्त्वग्वेत्त्विति तस्मिन्नु पुरोडाशीयानावपत्यथेष्टानूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामी
ति मुसलमवदधात्यद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यं सुशमि शमिष्वेत्यथ हविष्कृतमा
ह्वयति हविष्कृदेहि हविष्कृदेहीति त्रिरथ दृषदुपले वृषारण्वेणोच्चैः समाहंतीषमावदोर्जमावद
द्युमद्वदत वयं संघातं जेष्मेत्यवहत्यो तुषान्कलो नरतः शूर्पमुपयच्छति वर्षवृद्धमसीति तस्मि
न्नु पुरोडाशीयानुद्वपति प्रति त्वा वर्षवृद्धं वेत्त्वित्यथोद्धूय पर्यावर्त्य परापुनाति परापूतं रक्षः प
रापूता अरातय इति सत्येन तुषानुपहत्य मां दिशं निरस्यति रक्षसां भागोसीत्यथाप उपस्पृ
श्य विविनक्ति वायुर्वो विविनक्त्विति पात्र्यां तण्डुलान्प्रस्कन्दयति देवो वः सविता हिरण्यपाणिः प्रति
गृह्णात्वित्यथ हंत्र्यै प्रयच्छन्नाह त्रिष्फलीकर्तवै त्रिष्फलीकृतान्मे प्रब्रूतादिति त्रिष्फलीकृतान्प्रा
हुस्त्रिष्फलीक्रियमाणानो यो न्यंगो अवशिष्यते रक्षसां भागधेयमापस्तत्प्रवहतादि तद्इति तं

सूत्र ॥७॥

डुलप्रक्षालनमंतर्वेदिनिनयसुकरदेशेवैतस्मिन्कालेप्रातर्दोहधेनूर्दोहयत्सुदगग्रेणपवि
त्रेणनात्राततन्ति ॥६॥ अथप्रोक्षेषुत्रिष्फलीकृतेषुतथैवकृष्णाजिनमवधुनोत्यूर्ध्वग्रीवमुद
ङ्नवृत्यावधूतंरक्षोवधूताअरातयइतित्रिरथैनत्पुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृ
णात्यदित्यास्त्वगसिप्रतित्वापृथिवीवेत्त्वितितस्मिन्नुदीचीनकुम्बांशम्यांनिदधातिदिवस्कंभनि
रसिप्रतित्वादित्यास्त्वग्वेत्त्वितितस्यांप्राचीदृषदमध्यूहतिधिषणासिपर्वत्याप्रतित्वादिवस्कंभनि
र्वेत्त्वितिदृषद्युपलामध्यूहतिधिषणासिपार्वतेयीप्रतित्वापर्वतिर्वेत्त्वितितस्यांपुरोडाशीयानधिव
पतिदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नयेजुष्टमधिवपाम्यग्नीषोमाभ्या
ममुष्माअमुष्माइतियथादेवतमथैवमधिवदतेधान्यमसिधिनुहिदेवान्धिनुहियज्ञंधिनुहि
यज्ञपतिंधिनुहिमोयज्ञनियामितिपिंषतिप्राणायत्वापानायत्वाव्यायेनोत्वेत्यधबाहू-अन्ववेक्ष

राम ॥७॥

तादीर्घामनुप्रसितिमायुषेधामिति कृष्णाजिनेपिष्टानिप्रस्कंदयतिदेवोवः सविताहिरण्यपाणिः
प्रतिगृह्णात्वितिहविःपेष्यप्रयच्छन्नाहसंवपेतीपिंषाण्यूनिकुरुतादितिपिंषतिपुरोडाशीया
न्निरेनैव्योदधातियद्द्विचरुंकरिष्यन्भवतिप्रागधिवपनाच्चरुंपुरोडाशीयान्विभजेन् ॥७॥ अथै
तानिकपालानिप्रक्षालितानिजघनेनगार्हपत्यमुपसादयत्यष्टौदक्षिणतएकादशोत्तरतोयजघ
नेनगार्हपत्यमुपविश्यधृष्टिमादत्तेधृष्टिरसिब्रह्मयच्छेतिगार्हपत्यमभिमंत्रयतेऽपाग्नेऽग्निमा
मादंजहीतिनिष्क्रव्यादंसेधेतिदक्षिणांगारंनिरस्यपर्यथान्यमावर्तयन्नादेवयजंवहेतिदक्षि
णेषांकपालानांमध्यमेनाभ्युपदधातिध्रुवमसिपृथिवींदृंहायुर्दृंहप्रजांदृंहसजातानस्मै
यजमानायपर्यूहेत्यंगारमधिवर्तयतिनिर्दग्धंरक्षोनिर्दग्धाअरातयइत्यथपूर्वार्धमुपदधा
तिधर्त्रमस्यंतरिक्षंदृंहप्राणंदृंह अपानंदृंहसजातानस्मैयजमानायपर्यूहेत्यथापरार्ध

सत्र मुपदधाति धरुणमसि दिवं दृंह चक्षुर्दृंह श्रोत्रं दृंह सजातानस्मै यजमानाय पर्यूहेत्यथ
॥८॥ दक्षिणार्ध्यमुपदधाति धर्मासि दिशो दृंह योनिं दृंह प्रजां दृंह सजातानस्मै यजमानाय
पर्यूहेत्यथ पूर्वमुपधिमुपदधाति चितस्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानायप
६ र्यूहेत्यथापरमेवमेव द्वे अरत्नी संस्पृष्टे उपदधाति चित स्थ प्रजामस्मै सजातानस्मै यजमा रयिमस्मै ४
नाय पर्यूहेत्यथैनान्यंगारैरधिवासयति भृगूणामंगिरसां तपसा तप्यध्वमित्यथैनानि योगे
न युनक्ति यानि घर्मे कपालान्युपचिन्वंति वेधसः। पूष्णस्तान्यपि व्रत इंद्रवायू युंक्तामित्येवमे
वोत्तराणि कपालान्युपदधात्यसमीधते कपालान्युपधेते चरुस्थालीमध्यस्यंति श्रपणानि तपं राम
ति पिष्टसंयवनीया आपः ॥८॥ अथोत्तरेण गार्हपत्यमुपविश्य वाचंयमास्तिरः पवित्रे पात्र्यां ॥८॥
कृष्णाजिनासि ष्टानि सं वपति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नयेजु

हूँ संवपाम्यग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतमथ परिकर्मिणमाहाहरापस्त्वानयेत्या
हरति प्रैषकारः प्रणीताभ्यः स्रुवेणोपहत्य वेदेनोपयम्य पात्र्यां वा तं धारयेदेवं मदन्तीभ्यस्ताउभ
यीरानीयमानाः प्रतिमन्त्रयते समापो अद्भिरग्मत समोषधयो रसेन सं रेवतीर्जगतीभिर्म
धुमतीर्मधुमतीभिः सृज्यध्वमित्यथानुपरिप्लावयत्याज्यं परिप्रजाता स्थ समद्भिः पृच्यध्व
मिति संयौति जनयत्यै त्वा संयौमीति संयुत्य स्रुच्याभिमृशत्यग्नये त्वाग्नीषोमाभ्याममुष्मा अ
मुष्मा इति यथादेवतं पिंडं करोति मखस्य शिरोसीति तं दक्षिणेषां कपालानां प्रत्यूह्यांगारां
स्तेष्वधिपृणक्ति धर्मोसि विश्वायुरिति प्रथयत्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति तं तन्वंतं
कूर्मप्रकारं करोति सर्वाणि कपालान्यभिप्रथयतीति ब्राह्मणं ॥ ६ ॥ अथातिरः पवित्रमाज्यस्था
ल्यामाज्यं निर्वपति महीनां पयोस्योषधीनां रसस्तस्य तेक्षीयमाणस्य निर्वपामि देवयज्यायै

इत्यथोत्तरतो भस्ममिश्रानंगारान्निरूह्य तेष्वधिश्रयत्येवमेवोत्तरं पुरोडाशमधि घृणं त्वथ
शृतमथ दध्यथ पात्राम यथानीय दक्षिणस्य पुरोडाशस्य त्वचं ग्राहयति त्वचं गृह्णीष्व त्वचं गृ
सूत्र ॥१९॥ ह्णीष्वेति त्रिरथोत्तरस्याथ पर्यग्निकरोत्यन्तरितं रक्षोन्तरिता अरातय इति त्रिरथ दक्षिणं पु
रोडाशं श्रपयति देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाके ग्निस्ते तनुवं मातिधागिति गार्हपत्य
1 मभिमंत्रयते अग्ने हव्यं रक्षस्वेत्येवमेवोत्तरं पुरोडाशं श्रपयत्यथ दक्षिणं पुरोडाशं भस्मना
भिवास्य वेदेनाभिवासयति सं ब्रह्मणा पृच्यस्व सं ब्रह्मणा पृच्यस्वेति त्रिरथोत्तरमविदहन्तः
श्रपयतेति वाचं विसृजते ऽत्रैतत्पात्री से क्षालनं गार्हपत्यादंगारेणाभितप्य हत्वा न्तर्वेदिप्रती
चीनं त्रिः स्फुले त्वासु निनयत्येकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहेत्यथ वेदमादत्ते यं राम ॥१९॥
वेदः पृथिवीमन्वविंदद्गुहा सतीं गहने गह्वरेषु। सविंदतु यजमानाय लोकमच्छिद्रं यज्ञं भूरि

क्रमोक्रुशालितिवेदेनवेदिंत्रिःसंमार्ष्टिवेदस्नवेदिंविविदुःपृथिवींसापप्रथेपृथिवीपार्थिवा
निगर्भंबिभर्त्तिभुवनेष्वंतस्ततोयज्ञोजायतेविश्वदानिरिति॥२०॥अथजघनेनवेद्यैतिष्ठन्स्फ्य
मादत्तेदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददइत्यादायाभिमंत्रयतइंद्रस्यबा
हुरसिदक्षिणःसहस्रभृष्टिःशततेजाइत्यथैनंबर्हिषासंस्पृशतिवायुरसितिग्मतेजाःशतभृष्टि
रसिवानस्पत्योद्विषतोवधइत्यथांतर्वेद्युदीचीनाग्रंबर्हिर्निदधातिपृथिव्यैवर्मासिवर्मयजमा
नायभवेतितस्मिन्स्फ्येनप्रहरतिपृथिविदेवयजन्योषध्यास्तेमूलंमाहिंसिषमित्यपहतोर
रुःपृथिव्याइत्यादत्तेव्रजंगच्छगोस्थानमितिहरतिवेदिंप्रत्यवेक्षतेवर्षतुतेद्यौरितिहत्वोत्करेनिर्व
पतिबधानदेवसवितःपरमस्यांपरावतिशतेनपाशैर्योस्मान्द्वेष्टियंचवयंद्विष्मस्तमतोमा
मौगितिद्वितीयंप्रहरतिपृथिविदेवयजन्योषध्यास्तेमूलंमाहिंसिषमित्यपहतोररुःपृथिव्यै

सूत्र

॥१०॥

10

देवयजन्यैररस्याददेव्रजंगच्छगोस्थानमितिहरतिवेदिंप्रत्यवेक्षतेवर्षतुतेद्यौरितिहत्वोत्करेनि
वपतिबधानदेवसवितःपरमस्यांपरावतिशतेनपाशैर्योस्मान्द्वेष्टियंचवयंद्विष्मस्तमतोमामौगि
तितृतीयंप्रहरतिपृथिविदेवयजन्योषध्यास्तेमूलंमाहिंसिषमित्यपहतोररुःपृथिव्याअदे
वयजननररस्याददेव्रजंगच्छगोस्थानमितिहरतिवेदिंप्रत्यवेक्षतेवर्षतुतेद्यौरितिहत्वोत्करेनिवप
तिबधानदेवसवितःपरमस्यांपरावतिशतेनपाशैर्योस्मान्द्वेष्टियंचवयंद्विष्मस्तमतोमामौग
ररुस्तेदिवंमास्कानित्यत्रानुवर्तयतितूष्णींचतुर्थंहरतिसहबर्हिषाथपूर्वंपरिग्राहंपरिगृह्णा
तिवसवस्त्वापरिगृह्णन्तुगायत्रेणछन्दसेतिदक्षिणतोरुद्रास्त्वापरिगृह्णन्तुत्रैष्टुभेनछन्दसेतिप
श्चादादित्यास्त्वापरिगृह्णन्तुजागतेनछन्दसेत्युत्तरतोथकरणंजपतीमांनराःकृणुतवेदिमेत्यव
सुमतींरुद्रवतीमादित्यवतींवर्ष्मन्दिवोनाभापृथिव्यायथायंयजमानोनरिष्येदित्यथप्राचीं

राम

॥१०॥

स्फ्येन वेदिं मृद्धंति देवस्य सवितुः सवे कर्म कृण्वंति वेधस इत्यथाग्नीध्रमाहाग्नीदिति स्त्रिर्हरेति
तत स्त्रिराग्नीध्रो हरति यदाग्नीध्र स्त्रिर्हरत्यथ संप्रैषमाह ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामीति
प्रसूतस्तूत्तरं परिग्राहं परिगृह्णाति ऋतमसीति दक्षिणात ऋतसदनमसीति पश्चात् ऋतश्रीर
सीत्युत्तरतोथ प्रतीचीं स्फ्येन वेदिं योयुप्यते धाम्नासि स्वधा असि उर्वी चासि वस्वी चासि पुराक्रू
रस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीरदानुर्यामैरयंश्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदि
श्य यजन्त इत्यथान्तर्वेदि तिर्यञ्चं स्फ्यं स्त — संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय
स्रुवं च स्रुचश्च संमृड्ढि पत्नीं संनह्याज्येनोदेहीत्याह । रंयोताः प्रोक्षणीरभिपूर्य दक्षिणेनाध्वर्यु
तास्फ्य उपनिनीय स्फ्यस्य वर्त्मन्सादय इत्योत्करे स्फ्यं निहन्ति यो मा हृदा मनसा यश्च वाचायो
ब्रह्मणा कर्मणा द्वेष्टि देवाः यः श्रुतेन हृदयेनेष्णता च तस्येन्द्र वज्रेण शिरश्छिनद्मीति हस्तौ प्रक्षा

सूत्र ॥२१॥

ल्पस्पांश्च प्रक्षाल्योपसादयेत्येतदिध्माबर्हिर्दक्षिणमिध्ममुत्तरं बर्हिः ॥११॥ अथैताः स्रुचः
समादत्ते दक्षिणेन स्रुवं जुहूपभृतौ सव्येन ध्रुवां प्राशित्रहरणं वेदपरिवासनानीति गार्हपत्ये
प्रतितपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयोऽग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामीत्यथ स्रुवꣳ समा
र्ष्टि गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ संमार्ज्मीति त्रिरन्तरतस्त्रिर्बाह्यतस्त्रिरेव मूले दंडꣳ
संमृज्याद्भिः सꣳस्पृश्य प्रतितप्योत्स्रयच्छत्यथ जुहूꣳ संमार्ष्टि वाचं प्राणं मा निर्मृक्षं वाजिनीं त्वा स
पत्नसाहीꣳ संमार्ज्मीति तथैव संमृज्याद्भिः सꣳस्पृश्य प्रतितप्योत्स्रयच्छत्यथोपभृतꣳ संमार्ष्टि च
क्षुः श्रोत्रं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्मीति तथैव संमृज्याद्भिः सꣳस्पृश्य प्रतित
प्योत्स्रयच्छत्यथ ध्रुवां संमार्ष्टि प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्मीति त याम
थैव संमृज्याद्भिः सꣳस्पृश्य प्रतितप्योत्स्रयच्छत्यथ प्राशित्रहरणꣳ संमार्ष्टि रूपं वर्णं पशूनां मा ॥२१॥

निर्मृक्षं वाजिनां त्वा सपत्नसाहिं संमार्ज्मीति तथैव संमृज्याद्भिः संस्पृश्य प्रतितप्योत्त्रयच्छ यथैता
नि स्त्रुकू संमार्ज्मि नान्यद्भिः संस्पृश्य गार्हपत्येऽनुप्रहरति दिवः शिल्पमवततं पृथिव्याः ककुभिः श्रि
तं तेन वयं सहस्रवल्शेन सपत्नं नाशयामसि स्वाहेत्यथाग्रेणोत्करं तृणानि संस्तीर्य तेषु स्रु
चः सादयित्वाथैतां पत्नीमन्तरेणाव घुक्षरो प्रपा घजघनेन दक्षिणेन गार्हपत्यसमुदीचीमुपवेश्य
योक्त्रेणासेन ह्यस्याशासानासौमनसं प्रजांसौभाग्यं तनूं अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय
कमित्यथैनांतिरः पवित्रमपश्याचामयति पयस्वतीरोषधयः पयस्वद्वीरुधां पयः अपां पयसो
यत्पयस्तेन मामिन्द्र संसृजेत्यथैनां गार्हपत्ये समिधमाधापयत्यग्ने व्रतपते व्रतं चरिष्यामि त
च्छकेयं तन्मे राध्यतां स्वाहा वायो व्रतपते आदित्य व्रतपते व्रतानां व्रतपते व्रतं चरिष्यामि तच्छके
यं तन्मे राध्यतां स्वाहेत्यथ जघनेन गार्हपत्यमुपसीदति सुप्रजसस्त्वा वयं सुपत्नीरुपसेदि

सूत्र
॥१२॥

12

म। अग्ने सपत्नदंभनमदब्धासो अदाभ्यं। इंद्राणीवाविधवा भूयासमदितिरिव सुपुत्रा अस्थूरि
त्वा गार्हपत्योपनिषदे सुप्रजास्त्वाय। मम पुत्राः शत्रुहणोथो मे दुहिता विराट्। उताहमस्मि संजया
पत्युर्मे श्लोक उत्तमः इत्यथैनां वाचयति ऊनैतिरिक्तं धीयाताद् इत्यथैनां गार्हपत्यमीक्षयत्यग्ने गृ
हपत उपमाह्वयस्व देवानां पत्नीरुपमाह्वय धं पत्नि पत्न्येषते लोको नमस्ते अस्तु मा मा हिंसीरि
त्यथैनामाज्यमवेक्षयति महीनां पयोस्योषधीनां रसोऽदब्धेन त्वा चक्षुषावेक्षे सुप्रजास्त्वायेत्य
थैनं गार्हपत्ये अधिश्रयति तेजोसीति समिधमुपयत्य प्राङुदाहरति तेजोनु प्रेहीति त्यथैनदाहव
नीये अधिश्रयत्यग्निस्ते तेजो मा विनैदिति यत्रैतां समिधं मध्यत आहवनीयस्याभ्यादध्यात् अथै
नद— णप्रोक्षणीः पर्याहृत्य दक्षिणार्धे वेद्यै निधाय यजमानमाज्यमवेक्षयति निमील्यावेक्षय यम
तीति ब्राह्मणमथैनद्यथाहृतं प्रतिपर्याहृत्योत्तरार्धे वेद्यै निधायाध्वर्युरवेक्षते अग्ने जिह्वासि सु ॥१२॥

भूर्देवानांधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेभवेत्यथैनउदीचीनाग्राभ्यांपवित्राभ्यांपुनराहारंत्रिरु
त्पुनातिशुक्रमसिज्योतिरसितेजोसीत्यथप्रोक्षणीरुत्पुनातिदेवोवःसवितोत्पुनात्वच्छिद्रेणपवित्रे
णवसोःसूर्यस्यरश्मिभिरित्यपश्चःप्रोक्षणीषुपवित्रेअवधायादत्तेदक्षिणेनस्रुवंसव्येनजुहूं
वेदेप्रतिष्ठाप्यतस्यांगृह्णातिशुक्रंत्वाशुक्रायांधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेगृह्णामीत्येतेनय
जुषाचतुर्गृहीतंगृहीत्वासंमृश्योत्तरंयच्छत्यथोपभृतिगृह्णातिज्योतिस्त्वाज्योतिषिधाम्नेधाम्नेदे
वेभ्योयजुषेयजुषेगृह्णामीत्येतेनयजुषाष्टगृहीतंगृहीत्वाभूयसीत्याहानूगृह्णानःकनीयश्चा
ज्येगृह्णीतेतथैवसंमृश्योत्तरंयच्छत्यथध्रुवायांगृह्णातिर्चिस्त्वार्चिषिधाम्नेधाम्नेदेवेभ्योयजुषे
गृह्णामीत्येतेनयजुषाचतुर्गृहीतंगृहीत्वाभिपूर्यतथैवसंमृश्योत्तरंयच्छति॥१२॥अथैतामाज्य
स्थालींसस्रुवांजघनेनवेद्यैनिधायप्रोक्षणीरुन्महयन्नुपोत्तिष्ठत्यापोदेवीरग्रेपुवोअग्रेगुवोअग्रइ

स्त्र.
॥१३॥
13

मं यज्ञं नय ताग्ने यज्ञपतिं धत्त युष्मानिंद्रो वृणीत वृत्रतूर्ये यूयमिंद्रम वृणीध्वं वृत्रतूर्ये इत्यद्भिरेवा
पः प्रोक्षति प्रोक्षितास्थ प्रोक्षितास्थेति त्रिः स्थे — विस्रंस्य प्रोक्षति कृष्णोस्याखरेष्ठोग्नये त्वा स्वाहे
ति वेदिं प्रोक्षति वेदिरसि बर्हिषे त्वा स्वाहेति बर्हिः प्रोक्षति बर्हिरसि स्रुग्भ्यस्त्वा स्वाहेत्याहरंत्येतद्ब
र्हिरंतरेण प्रणीताश्चाहवनीयं च तदंतर्वेदि पुरोग्रंथ्यासाद्य प्रोक्षति दिवे त्वेत्यग्रमंतरिक्षाय
त्वेति मध्यानि पृथिव्यै त्वेति मूलानि सह स्रुवा पुरस्तात्प्रसंचं ग्रंथिं प्रत्युस्यति शिष्टाः प्रोक्षणीर्नि
नयति दक्षिणायै श्रोणेरोत्तरायै श्रोणेः स्वधा पितृभ्य ऊर्ग्भव बर्हिषद्भ्य ऊर्जा पृथिवीं गच्छो
त्युदूह्य प्रोक्षणीधाने बर्हिर्विस्रस्य पुरस्तात्प्रस्तरं गृह्णाति विष्णोः स्तूपोसीति तस्मिन्पवित्रे
अपिसृजति यजमाने प्राणापानौ दधामीति वान्नृह्यौ वा ते यजमानाय वा ब्राह्मणाय वा प्रयच्छ यथे
तानि बर्हिः सन्नहनान्यापातयति दक्षिणायै श्रोणेरोत्तरात्पू सादयथ दक्षिणेन वेद्यंतेन बर्हिर्मुष्टिं स्त

यम
॥१३॥

णाति देवबर्हिः रूर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य इति तां बहुलां पुरस्तात्प्रतीचीं त्रिवृतमनति
दृश्यं स्तृणात्यथ प्रस्तरपाणिः प्रागभिसृप्य परिधीन्परिदधाति गंधर्वोसि विश्वावसुर्विश्वस्मा
दीषतो यजमानस्य परिधिरिड ईडित इति मध्यममिंद्रस्य बाहुरसि दक्षिणो यजमानस्य परिधि
रिड ईडित इति दक्षिणं मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ई
डित इत्युत्तरमथ सूर्यं त्वा पुरस्तात्परिदधाति सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्याः इत्यूर्ध्वे
समिधावादधाति वीतिहोत्रं त्वा कवे द्युमंतं समिधीमह्यग्ने बृहंतमध्वर इति दक्षिणां तूष्णीमु
त्तरामभ्याधायांतर्वेद्युदीचीनाग्रौ विधृती तिरश्ची सादयति विशो यंत्रे स्थ इति विधृत्योः प्रस्तरं व
सूनां रुद्राणामादित्यानां सदसि सीदेति प्रस्तरे जुहूं जुहूरसि घृताची नाम्ना प्रियेण नाम्ना
प्रिये सदसि सीदेत्युत्तरामुपभृतमुपभृदसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदे

सूत्र ॥१४॥ 14

सुत्तरां ध्रुवां ध्रुवासि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदेत्यथ स्रुचः सन्ना अभिमृश
त्यता असदन्नृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियमिति विष्णू
नि स्थ वैष्णवानि धामानि स्थ प्राजापत्यानीत्याऽज्यान्यभिमंत्रयते ॥१४॥ अथाह्ले दक्षिणेनाऽपस्त्या
लीं सस्रुवां सव्यनपात्रीं वेदमिध्मं तत्समादाय प्रदक्षिणमावृत्य प्रत्यङ्ङुदङ्ङ्ज घनेन गार्हपत्य
मुपविश्य पात्र्यां द्वेधोपस्तरणीं तस्यां नेते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्त्सु
सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इत्यथ ध्रुष्टिमादाय दक्षिणस्य पुरोडाशस्यां
गारानपोहतीदमहं सेनाया अभीत्वर्यै मुखमपोहामीत्यथैनं विदर्शयति सूर्यज्योतिर्विभाहि
महत इंद्रियायेति वेदेन विरजसं कृत्वाभिघारयत्याप्यायतां घृतयोनिरग्निर्हव्यानुमन्यतां ख राम ॥१४॥
मंक्ष्व त्वं च मंक्ष्व सुरूपं त्वा वसुविदं पशूनां तेजसाग्नये जुष्टमभिघारयामीति यद्देवस्यो वाभव

स्यथैनमुद्वासयति श्रुत उत्स्नाति जनिता मतीनामित्याज्येन स्रुसं तर्पयत्यर्द्धः प्रथस्तुर्भुवनस्य
गोपा इ स्युपरिष्टादभ्यज्याधस्तादुपानक्ति यस्त्वात्मा पशुषु प्रविष्टस्तामं स्वेत्सेवमेवोत्तरं पुरो
डाशमुद्वासयत्यथ श्रुतामथ दध्यथ सान्नाय्येऽप्यलं करोति यस्त्वात्मा पशुषु प्रविष्टो देवानां
विष्ठामनुयोपितस्थे। आत्मन्वानुसोमघृतवान्हि भूत्वा देवानू गच्छ सुवर्विदयजमानायमह्य
मिति प्रत्यत्यक्कपालान्युद्वासयतीराभूतिः पृथिव्यै रसो मोत्क्रमीदिति संख्यायोद्वासयति यजमा
नस्य गोपीथायेति ब्राह्मणमथैनं स्रुवमाज्यस्य पूरयित्वोत्तरेण पुरोडाशाववदधात्यथैनानि
संपरिगृ ह्योत्तरवेद्यासादयति भूर्भुवः सुवरित्येताभिर्व्याहृतिभिर्मध्यतः पुरोडाशावासादय
ति दक्षिणतः श्रुतमुत्तरतो दध्यथैनं स्रुवमग्रेणास्रुचः पर्याहृत्य दक्षिणेन जुहूं प्रस्तारे सादयति
स्योनो मे सीद सुषदः पृथिव्यां प्रथयि प्रजया पशुभिः सुवर्गेलोके दिवि सीद पृथिव्यामन्तरिक्षे हसु

सूत्र
॥१५॥
15

त्तरो भूयासमधरे मत्सपत्ना इत्यथैनं यथाहृतं प्रतिपर्याहृत्य ध्रुवायामेव दधात्यृषभोऽसि शा
क्वरो घृताचीनां सूनुः प्रियेण नाम्ना प्रिये सदसि सीदेति ॥१४॥ अथेध्मात्समिधमाददान आहा
ग्नये समिध्यमानायानुब्रूहीत्यथ यत्र होतुरभिजानाति प्र वो वाजा अभिद्यव इति तत्प्रथमामभ्या
दधाति प्राणं वै प्राणं वैऽभ्यादधात्यथ यत्र होतुरभिजानाति समिद्धो अग्न आहुतेति तदंततोऽभ्याद
धाति परिसमिद्धं शिनष्ट्यथ यत्र होतुरभिजानात्याजुहोता दुवस्यतेति तदेतेनैव वेदेन त्रिरा
हवनीयमुपवाजयत्यनूक्तासु सामिधेनीषु ध्रुवाज्यात्स्रुवेणोपहत्य वेदेनोपयम्य प्राजापत्यं ति
र्यंचमाघारमाघारयति प्रजापतये स्वाहेति मनसाथ संप्रैष माहाग्नीदग्नीं स्त्रिस्त्रिः संमृड्ढी
त्यथैष आग्नीध्र इध्मसंनहनानि स्फ्य उपसंगृह्य परिधीन्संमार्ष्टि त्रिर्मध्यमं त्रिर्दक्षिणार्ध्यं त्रि
रुत्तरार्ध्यं त्रिराहवनीयमुपवाजयत्यग्ने वाजजिद्वाजं त्वा सरिष्यंतं वाजं जेष्यंतं वाजिनं वा

राम
॥१५॥

उज्जितं वा उज्जित्यायै संमार्ज्म्यग्निमन्वाह मन्त्राद्यांयेस्यथाग्रेण जुहूपभृतौ प्राञ्चमञ्जलिं करो
ति भुवनमसि विप्रथस्वाग्ने यष्टरिदं नम इत्या दक्षिणेन जुहूं जुह्वेह्यग्निस्त्वा ह्वयति देवय
ज्याया इति सव्येनोपभृतमुपभृदेहि देवस्त्वा सविता ह्वयति देवयज्याया इति सव्येनास्याः क्रामं ज
पस्यग्नाविष्णू मा वामवक्रमिषं विजिहाथां मा मा संताप्सं लोकं मे लोककृतौ कृणुतमिति स्थानं
कल्पयते विष्णोः स्थानमसीत्यन्वारब्धे यजमाने मध्यमे परिधौ संस्पृश्य ऊर्ध्वमाघारमाघारय
ति संततं प्राञ्चमव्यवच्छिन्दन्नितरं द्रोग्नं कृणोद्दीर्याणि समारभ्योर्ध्वो अध्वरो दिविस्पृशमह्रुतो
यज्ञो यज्ञपतेरिन्द्रावान्स्वाहेति बृहद्भा इति स्रुचमुद्गृह्णात्यथ संस्पर्शयन्स्रुचावुदङ्ङ्ः सा
क्रामं जपति पाहि माग्ने दुश्चरितादा मा सुचरिते भजेति जुह्वा ध्रुवां समनक्ति मखस्य शिरो
सि संज्योतिषा ज्योतिरक्तामिति त्रिरथ यथायतनं स्रुचौ सादयित्वा प्रवरं प्रवृणीत उत्करे इ

स्त्र.
॥१६॥
16

ध्मसन्नहनानि स्फ्य उपसंगृह्य पृष्ठमाग्नीध्रो जुपश्लिष्य सथाश्रावयन्त्योश्रावयास्तु श्रौषडि
त्यग्निर्देवो होता देवानूयक्षद्विद्वानु चिकित्वन्मनुष्वद्भरतवदमुवदमुवद्ब्रह्मण्वदाहवक्षन्नू ब्रा
ह्मणा अस्य यज्ञस्य प्रावितार इत्यसौ मानुष इति होतुर्नाम गृह्णात्युपोत्थाय होता विमुंचति विमु
क्तोध्वर्युरुपविशति प्रसवमाकांक्षन्नास्ते ॥१५॥ अथ यत्र होतुरभिजानाति घृतवतीमध्वर्यो
स्रुचमास्यस्वेति तज्जुहूपभृतावादायात्याक्रम्याश्राव्याह समिधो यजेति वषट्कृते जुहोति
यजयजेति चतुर्थं यस्यपत्नधर्मोपभृदाज्यस्य जुह्वां समानयति पंच प्रयाजानिष्ट्वादेऽत्याक्र
म्य संस्रावेणानुपूर्वं हवींष्यभिघारयति ध्रुवामेवाग्रेऽथ दक्षिणं पुरोडाशमथ ध्रुवामथोत्त
रं पुरोडाशमथ पृषदाज्यमथ दध्युपभृतमंततोऽथ चतुराज्यस्य गृह्णानन्वाहाग्नयेनुब्रूहीत्यत्या
क्रम्याश्राव्याहाग्निं यजेति वषट्कृते उत्तरार्द्धपूर्वार्द्धे प्रतिमुखं प्रबाहुक् जुहोत्यथ चतुराज्य

राम
॥१६॥

स्य गृह्णान आह सोमायानुब्रूहीत्यत्याक्रम्याश्राव्याह सोमं यजेति वषट्कृते दक्षिणार्धपूर्वा
र्द्धे प्रतिमुखं प्रबाहुक् जुहोत्यथोपस्तीर्य दक्षिणास्य पुरोडाशस्य पूर्वार्धादवद्यन्नाहाग्नयेऽनुब्रूही
त्यथैनमुपतिष्ठते मा भेर्मा संविक्था मा त्वा हिंसिषं मा ते तेजोऽपक्रमीदित्यथैनमभिमृशति भेर
तमुद्रेमं नुचिं चावदानानि ते प्रत्यवदास्यामि नमस्त अस्तु मा मा हिंसीरिति पूर्वार्धादवदाया
परार्धादवद्यत्यभिघारयति प्रत्यनक्ति यदवदानानि ते वद्यन्विलोमाकार्षमात्मनः। आज्येन प्र
त्यनज्म्येनत्तत्त आप्यायतां पुनरित्यत्याक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोत्यथ चतुराज्यस्य
गृह्णान आह प्रजापतये स्रुपाः स्वनुब्रूहीत्स्रुवैरत्याक्रम्याश्राव्याह प्रजापतिमित्स्रुपां श्रुयजेत्स्रुवै
र्वषट्कृते जुहोत्यथोपस्तीर्योत्तरस्य पुरोडाशस्यापरार्धादवद्यन्नाहाग्नीषोमाभ्यामिति पौर्णमा
स्यामिंद्राय वैमृधायेति चेन्द्राग्निभ्यामित्यमावास्यावामसन्नयत इंद्रायेति सन्नयतो महेंद्रायेति
वा यदि महेंद्रयाजी भवति ॥१६॥ समान उपस्थानः समानोऽभिमर्शनोऽपरार्धादवदाय पूर्वार्धादव

सूत्र

॥१७॥ 17

घृतस्याभिघारयति समानः प्रत्यंजनो त्याक्रम्याश्राव्याहाग्नीषोमौ यजेति वषट्कृते जुहोत्यथोपस्ती
र्य द्विः पुरोडाशस्यावद्यन्नाहेन्द्रायानुब्रूहीति महेन्द्रायेति वा यदि महेन्द्रयाजी भवति द्विः पुरोडा
शस्यावद्यति द्विः शृतस्य द्विर्द्धाभिघारयति प्रत्यनक्त्यत्याक्रम्याश्राव्याहेन्द्रं यजेति महेन्द्रमि
ति वा यदि महेन्द्रयाजी भवति वषट्कृते जुहोत्यथोपस्तीर्य दक्षिणस्य पुरोडाशस्योत्तरार्धादवद्य
न्नाहाग्नये स्विष्टकृतेनुब्रूहीति सकृद्दक्षिणस्य पुरोडाशस्योत्तरार्धादवद्यति सकृद्ध्रुवाद्वात्स
कृदुत्तरस्य पुरोडाशस्य सकृच्छृतस्य सकृद्द्धो द्विरभिघारयति न प्रत्यनक्त्यवद्येत स्विष्टकृति
स्रुवेण पार्वणौ होमौ जुहोत्यृषभं वाजिनं वयं पूर्णमासं यजामहे । स नो दोहतां सुवीर्यं राय
स्पोषं सहस्त्रिणं प्राणाय सुराधसे पूर्णमासाय स्वाहेति पौर्णमास्याममावास्या सुभगा सुशेवा धे
नुरिव भूय आप्यायमाना सा नो दोहतां सुवीर्यं रायस्पोषं सहस्त्रिणमपानाय सुराधसे मा
वास्यायै स्वाहेत्यमावास्यायामत्याक्रम्याश्राव्याहाग्निं स्विष्टकृतं यजेति वषट्कृत उत्तरार्धपू

राम

॥१७॥

र्वाधेहीति हायपूर्वाग्नाहुती जुहोत्यत्रैतन्मे क्षणमाहवनीयेनुप्रहरत्यथैनत्संꣳस्त्रावेणाभिजुहो
त्यथोदङ्ङ्त्यात्क्रम्य जुह्वामपआनीय संक्षालनमेतत्परिधिषु निनयति वैश्वानरे हविरिदं जुहोमि
साहस्रमुत्सꣳ शतधारमेतं स नः पितरं पितामहं प्रपितामहं स्वर्गे लोके गच्छतु पिन्वमानꣳ स्वधा
नमइति निर्णिज्य स्रुचं निष्टप्याद्भिः पूरयित्वा बहिः परिधिनिनयति इमꣳ समुद्रꣳ शतधारमु
त्सं व्यच्यमानं भुवनस्य मध्ये। घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन्निति यत्रैतदो
पभृतमाज्यं सर्वं श एव जुह्वोसमानयति अथ यथायतनꣳ स्रुचौ सादयित्वा प्राशित्रमवद्यति द
क्षिणस्य पुरोडाशस्योत्तरार्धाद्यवमात्रमङ्गुष्ठयो यवमात्रादवाधाय कृत्यतामिदं। मा रूरूपा
म यज्ञस्य शु ꣳ स्विष्टमिदं हविरित्यथैनत्स्रुवदण्डेनाभिघार्य जघनेन प्रणीताः सादयित्वाद्भिः
स्रुवदण्डꣳ संस्पृश्यावदधाति ॥७॥ अथ कंꣳसं वा चमसं वेडोपहवनेयाचति तदेतवेदि निधा
यं तस्मिन्नुपस्तीर्य दक्षिणस्य पुरोडाशस्य दक्षिणाद्वीत्प्रस्तृत्यावदधाति मनुना दृष्टां घृतपदीमि

सूत्र ॥१९॥

त्रावरुणेनसमीरितां॥ दक्षिणार्धाद्दसभिदन्नवद्यात्येकतोमुखोमिति द्वितीयमवदानानिसंभिघा
वधात्यथदक्षिणस्यैवपुरोडाशस्यपूर्वार्द्धात्र्यंगुलंवाचतुरंगुलंवाङ्गेनसुसेव्द्रसंसंतप्याग्रेण
ध्रुवांयजमानभागंनिदधातिद्विर्ध्रुवायाद्दवद्यतिद्विरुत्तरस्यपुरोडाशस्यद्विःश्रुतस्यद्विर्दध्रो
भिघारयत्यथहोतुर्द्विरंगुलावनक्तिजिघ्रेणभक्षयिलाचतुरवोत्तरेडामवद्यत्युपस्तरणेतिद्विय
दधात्यभिघारयतिसमान्वारभंतेऽध्वर्युश्चयजमानश्चब्रह्माचाग्नीध्रश्चाथयत्रहोतुरभि
जानातिदेव्याअध्वर्यवउपहूताउपहूतामनुष्याइतिनदक्षिणांपुरोडाशंचतुर्द्धाकृत्वाबर्हिषदंकरो
त्यथयत्रहोतुरभिजानातिउपहूतोयंयजमानइतितर्हियजमानोहोतारमीक्षमाणोवायुंम
नसाध्यायेदिसूपहूतायामिडायामग्नीध्रआदधातिषडवत्तमुपस्तरणात्यादधात्यभिघार
यत्युपस्तरणात्यादधात्यभिघारयतिप्राश्नंतिमार्जयंतेअथाहब्रह्मणेप्राशित्रंपरिहरेति
परिप्राशित्रंहरेत्यन्वपोनुवेदेनब्रह्मभागमथान्वाहार्यपाचसुब्रासयंत्येतद्धविरुच्छिष्टं॥१९॥

राम ॥१९॥

18

अथसंप्रैषमाह ब्रह्मन् प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीतिप्रसूतो
ऽग्नीत् समिधं मध्यमेऽआहवनीयस्याभ्यादधात्यथैषआग्नीध्रोस्फ्येर वेध्मसन्नहनैः परिधी
न्संमार्ष्टिसकृन्मध्यमंसकृद्दक्षिणार्धंसकृदुत्तरार्धंसकृदाहवनीयमुपवाजयत्यग्नेवाजजि
द्वाजंत्वाग्नेससृवांसंवाजंजिगिवांसंवाजिनंवाजजितंवाजजित्यायैसंमार्ज्म्यग्निमन्नादम
न्नाद्यायेत्यथैतानीध्मसन्नहनान्यद्भिः संस्पृश्याहवनीयेनुप्रहरति योभूतानामधिपतीरुद्र
स्तंतिचरोवृषापशूनस्माकंमाहिंसीरेतदस्तुहुतंतवस्वाहेत्यथजुहूपभृतावादायासाक्रम्या
श्राव्याहदेवान्यजेतिवषट्कृतेजुहोतियजयजेतित्रीन्प्रतिचानुयाजान्यजतिप्राचांततः सं
भिन्नत्यथोदङ्ङत्याक्रम्ययथायतनंस्रुचौसादयित्वावाजवतीभ्यांस्रुचौव्यूहतिवाजस्यमा
प्रसवेनोद्ग्राभेणोदग्रभीदितिदक्षिणेनजुहूमुद्गृह्याथासपत्नाँ इन्द्रोमेनिग्राभेणाध
राँ अकरितिसव्येनोपभृतंनिगृह्यास्रुग्राभंचनिग्राभंचब्रह्मदेवाअवीवृधन्नितिप्राचींजुहू

सूत्र ॥१९॥

19

मूह स्यथा सपत्नानिंद्राग्नीमेविषूचीनान्व्यस्यतामिति प्रतीचीमुपभृतं प्रत्यूहति प्राच्या परिधी
ननक्ति वसुभ्यस्त्वेति मध्यमं रुद्रेभ्यस्त्वेति दक्षिणमादित्येभ्यस्त्वेत्युत्तरमु ऽथोपभृतमङ्गिरः सं
स्पृश्य यथायतनं स्रुचौ सादयित्वा स्रुक्षु प्रस्तरमनक्त्यक्तं रिहाणा इति जुह्वामग्राणि वि यंतु
वय इत्युपभृति मध्यानि प्रजां योनिमामानिर्मृक्षमिति ध्रुवायां मूलानीत्यथ प्रस्तरात्तृणं प्रछि
द्य जुह्वामवदधात्यथाश्रावय सोऽश्रावयास्तु श्रौषडिति त्विषिता दैव्यो होतारो भद्रवाच्याय प्रेषि
तो मानुषः सूक्तवाकाय सूक्ता ब्रूहीति तमुपरीवप्रांचं प्रहरति नात्यग्रं प्रहरति न पुरस्तात्प्रत्यस्य
ति न प्रतिशृणाति न विष्वंचं वियौत्यूर्ध्वमुद्योत्यापर्ययं तामायत्रौषधयो मरुतां पृषतयः स्थ दिवं ग
छ ततो नो वृष्टिमेरयेत्यथाग्नीध्रमीक्षतेऽग्नीदिति तमाहाग्नीध्रः संवदस्वेत्यगानग्नीदित्याहाध्व
र्युरगन्नित्याहाग्नीध्रः श्रावयेत्याहाध्वर्युः श्रौषडित्याहाग्नीध्रः इदं ब्रूहीत्याहाध्वर्युरनुप्रहरेत्या
हाग्नीध्रोऽनुप्रहरति स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीत्यथोपोत्थायाहवनीयमुप

राम ॥१९॥

तिष्ठत आयुष्मा अग्नेस्यायुर्मे याहि चक्षुष्मा अग्नेसि चक्षुर्मे पाहीत्यथैनमामभिमृशति ध्रुवासीति
मध्यमं परिधिमनुप्रहरति यं परिधिं पर्यधत्था अग्ने देवपणिभिर्वीयमाणः। तं तऽएतमनुजोषं भरा
मि नेदेष त्वदपचेतयाता इत्यथैतराणुपसमस्यति यज्ञस्य पाथ उपसमितमित्यथैनांस्संस्रावेण
भिजुहोति जुह्वामुपभृतऽ संप्रस्रावयति सऽस्रावभागा स्थेषा बृहंतः प्रस्तरेष्ठा बर्हिषदश्च देवाइ
मां वाचमभिविश्वे गृणंत आसद्यास्मिन्बर्हिषि मादयध्वऽ स्वाहेत्यथ प्रदक्षिणमावृत्य प्रसव्य हुत्वा धु
र्याधुरि स्रुचौ विमुंचत्यग्ने वाममपन्न गृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने माधत्तं धुरि धु
र्यौ पातमिति यद्युवेनानो भवत्युत्कर एवैने स्रुचौ विमुंचयेत्तेनैव मंत्रेण॥१९॥ अथाद्भिर्दक्षिणेना
ज्यस्थालीऽ संस्रुवाऽ सग्नेन जुहूऽ होत्रे वेदं प्रत्त्य प्रदक्षिणमावृत्य प्रसंचावाद्भिर्वितो दक्षिणेनाध्व
र्युर्गार्हपत्यं परिक्रामत्युत्तरेण होता तौ जघनेन गार्हपत्यं पश्चात्तं चावुपविशतो दक्षिण एवाध्व
र्युरुत्तरो होताथाध्वर्युर्वेदमुपभृतं कृत्वाथ चतुराज्यस्य गृह्णान आह सोमायेसुपाऽ श्चनुब्रूही

स्रुत्र
॥२०॥
20

त्युच्चैराश्राव्याह सोममित्युपांशु यजेत्युच्चैर्वषट्कृते जुहोत्यथ चतुराऽउपस्य गृहीत्वाऽऽह त्वष्टारमि
त्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह त्वष्टारमित्युपांशु यजेत्युच्चैर्वषट्कृते जुहोत्यथ चतुराऽउपस्य गृहीत्वा
न्नाह देवानां पत्नीभ्य इत्युपांश्वनुब्रूहीत्युच्चैराश्राव्याह देवानां पत्नीरित्युपांशु यजेत्युच्चैर्वषट्
कृते परिश्रिते देवानां पत्नीर्यजत्यथ चतुर एवाऽउपस्य गृहीत्वाऽऽहाग्नये गृहपतय इत्युपांश्वनु
ब्रूहीत्युच्चैराश्राव्याहाग्निं गृहपतिमित्युपांशु यजेत्युच्चैर्वषट्कृत उत्तरार्द्धपूर्वार्द्धे ति हाय पूर्वा
आहुती जुहोत्यथाग्नेराहोतारमुपातीत्य होतुर्द्दक्षिणं गुलावनक्ति डिं घ्रेणा भस्त्रायिला चतुर्हस्तोऽंसे
पादयत्याऽउपस्थेव समन्वारभेते अथ युश्चेव पत्नी चोपहूता तामिडायामन्त्रीध्र आदधाति षड
वत्तं प्राश्नीतो मार्जयेते अथ स्रुचि चतुर्गृहीतं गृहीत्वा पसके पर्याहृत्यान्वाहार्यपचने प्रायश्चि
त्तं जुहोत्युलूखले मुसले यच्च शूर्प आशिश्लेष यद्दृषदि कृष्णाजिने यत्कपाले अवप्रुषो विप्रुषः सं
यजामि विश्वे देवा हविरिदं जुषन्तां यज्ञेया विप्रुषः संभिबद्धीरग्नौ ताः सर्वाः स्विष्टाः सुहुता जुहो

यम
॥२०॥

मिस्वाहेत्यपरंच तुर्गृहीतं गृहीत्वान्वाहार्यपचन एव धमप्रत्नश्च नान्याभ्याधाय फलीकरणानोपफ
लीकरणहोमं जुहोत्यग्ने दब्धायोशीततनो पाहि मा द्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्म
न्यै पाहि दुश्चरिताद विषं नः पितुं कृणु सुषदा योनिं स्वाहेत्यथैतेनैव यथेतमेत्य होत्रेव दंक्षतय
पत्नीं विष्यतीमं विष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः॥ धातुश्च योनौ सुकृतस्य लो
के स्योनं मे सह पत्या करोमीत्यथास्यै योक्त्रमेव काचा धायोदपात्रमानयति समायुषा से प्रज
या समग्ने वर्चसा पुनः। सं पत्नी पत्याहं गच्छे समात्मा तनुवा मम मेत्यथ मुखं विमृष्टे यदस्मृते स्मर
स्वतिगो द्धश्च वषु यन्मधुतेन मे वाजिनीवति मुखमङ्ग्धि सरस्वतीत्यपो निनयत्स्वमथस्यै वरूपं
कृत्वा तिष्ठतीति बालणं ॥२०॥ अथैनां तथैव गिरः पवित्रं मपस्याचामयति पयस्वतीरोषधयः प
यस्वद्वीरुधां पयः। अपां पयसो यत्पयस्तेन मामिंद्र संसृजेत्यथैनां गार्हपत्ये समिधमाधाप
यति अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे राधि स्वाहा वायो व्रतपते आदित्य व्रतपते व्रतानां

सूत्र ॥२९॥ व्रतपते व्रतमचारिषं तदशकं तन्मे राधि स्वाहेत्यथ यथा प्रपन्नं निष्क्रामत्यथ प्रागेत्य ध्रुवामाप्या
ययत्याप्यायतां ध्रुवा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः सूर्याया ऊधो दित्या उपस्थ उरुधारा पृथिवी
यज्ञे अस्मिन्निति यथा उपस्थाल्लाभ्युवेणोपघातं प्रायश्चित्तानि जुहोत्याश्रावितमत्याश्रावितं वष
ट्कृतमत्यनूक्तं च यज्ञे। अतिरिक्तं कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्स्वाहाकृ
ताहुतिरेतु देवान्स्वाहेत्यथ यज्ञस्य समृद्ध्यै जुहोतीष्टेभ्यः स्वाहा वषडनिष्टेभ्यः स्वाहा भेषजं दु
रिष्ट्यै स्वाहा निष्कृत्यै स्वाहा दौराध्यै स्वाहा दैवीभ्यस्तनूभ्यः स्वाहा ऋद्ध्यै स्वाहा समृद्ध्यै स्वाहा सर्व
समृद्ध्यै स्वाहा भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः स्वाहेमं वरुण तत्वा यामि त्वं नो अग्ने
स त्वं नो अग्ने त्वमग्ने अयास्ययासन्मनसा हितः। अयासन्हव्यमूहिषे या नो धेहि भेषजं स्वाहा
याश्चाग्नेरनभिशस्तीश्च सत्यमित्वमया असि। अयसा मनसा धृतो यसा हव्यमूहिषे या नो धे ॥ राम
हि भेषजं स्वाहा यदस्मिन्कर्मण्यन्तरगाम मंत्रतः कर्मतो वा। अनया हुत्या तच्छमयामि सर्वं ॥२९॥

तृप्यंतु देवा आ वृषंतां घृतेन स्वाहा। यदस्य कर्मणो त्यरीरिचं यद्वा न्यूनमिहाकरं। अग्निष्टत्स्विष्टकृ
स्त्र ॥२२॥ द्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे अग्नये स्विष्टकृते सुहुतहुत आहुतीनां कामानां समर्द्धयित्रे
स्वाहा प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं
स्याम पतयो रयीणां स्वाहा संथबर्हिषा धाह्नां सं प्रजुष्या ध्रुवा यां समनक्ति समं क्तां बर्हि
र्हविषा घृतेन समादित्यैर्वसुभिः संमरुद्भिः समिंद्रेण विश्वेभिर्देवेभिरक्तामित्संथैन दाहव
नीयेनुप्रहरति दिव्यं नभो गछतु यत्स्वाहा संथोपोत्थाय दक्षिणेन पदा वेदिमवक्रम्य ध्रुवयास
मिष्ट्य यजुर्जुहोति देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इन्द्रो देव देवेषु यज्ञं स्वाहा वाचि
स्वाहा वाते धाः स्वाहा सुहूहति स्रुवं निनयति प्रणीता उपोत्थाय यजमानो दक्षिणेन पदा विष्णुक्र
मानू क्रमते संतिष्ठत अमावास्यं वा पौर्णमासे वा हविः ॥२१॥ ॥शुभमस्तु॥ ॥श्रीराम॥ राम ॥२२॥
अमावास्येन वा पौर्णमासेन वा। अथ जघनेन गार्हपत्यं तिष्ठन्। अथैनस्यैशाखायै। अथ प्रात

सूत्र २२

हुते ग्निहोत्रे। अथ विष्णोः क्रमोसीति। अथैतस्यामवस्तृणाति तिरःपवित्रं। अथ प्रोक्षेणु।
अथैतानि कपालानि। अथोत्तरेण गार्हपत्यमुपविश्य। अथ तिरःपवित्रं। अथ जघने
नक्षिवेधैति ष्णुः। अथैताः स्रुचः समादत्ते। अथैतामाज्यस्थालीं सस्रुवां जघनेन। अथा
दत्ते दक्षिणेनाज्यस्थालीं सस्रुवं। अथेध्मसमिधं। अथ यत्र होतुरभिजानाति समानो
पस्थानः। अथ कं सेवाचमसे वा। अथ संप्रैषमाह। अथादत्ते दक्षिणेनाज्यस्थालीं सस्रु
वं। अथैनां तथैव॥ ॥ आज्यस्थालीं स्रुचं चैव स्रुचं च समिधं तथा॥ प्रोक्षणीमभि
घोतनकुशान्पात्राण्येतानि सादयेत्॥१॥ द्वं द्वं न्यच्य पवित्रे कृत्वा प्रोक्षण्यां तिरःपवित्र
मप आनीय त्रिरुत्पूय ताभिरुत्तानान्यन्यानि पात्राणि प्रोक्ष्याज्यस्थाल्यां तिरःपवित्रमाज्य

राम २२

सूत्र
॥२३॥

मानीय गार्हपत्ये उदग्गारान्पृथक्कृत्वा सते आज्यमधिश्रित्याभिद्योतनकुशेनावज्वाल्य तत्र
दर्भाग्रद्वयं प्रोक्षितं प्रास्य पुनरेव द्योतनकुशेनावज्वाल्य त्रिः पर्यग्नि कृत्वांगारान्प्रत्यूह्याज्यं पुन
राहारं त्रिरुत्पूय पवित्रे अग्नौ स्रुक्स्रुवौ सकुशौ निधाय संमृज्य प्रोक्ष्य गार्हपत्ये प्रतितप्य स्रु
चि चतुर्गृहीतं गृहीत्वाग्निसमीपे निदध्यादिति ॥ ॥शुभमस्तु॥ ॥ग्रंथसंख्या॥८५०॥ ॥

राम
॥२३॥

वैधायनसूत्र

४५०